# शिव बिल्वाष्टकम्

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रयायुधम् ।
त्रिजन्मपाप-संहारं ह्येकबिल्वं शिवार्पणम् ।।१।।

त्रिशाखैर्बिल्वपत्रैश्च ह्यच्छिद्रैः कोमलैः शुभैः ।
शिवपूजां करिष्यामि ह्येकबिल्वं शिवार्पणम् ।।२।।

अखण्डबिल्वपत्रेण पूजिते नन्दिकेश्वरे ।
शुद्ध्यन्ति सर्वपापेभ्यो ह्येकबिल्वं शिवार्पणम् ।।३।।

शालिग्रामशिलामेकां विप्राणां जातु अर्पयेत् ।
सोमयज्ञ-महापुण्यं ह्येककबिल्वं शिवार्पणम् ।।४।।

दन्तिकोटिसहस्राणि वाजपेयशतानि च ।
कोटिकन्या-महादानं ह्येकबिल्वं शिवार्पणम् ।।५।।

लक्ष्म्याः स्तनत उत्पन्नं महादेवस्य च प्रियम् ।
बिल्ववृक्षं प्रयच्छामि ह्येकबिल्वं शिवार्पणम् ।।६।।

दर्शनं बिल्ववृक्षस्य स्पर्शनं पापनाशनम् ।
अघोरपापसंहारं ह्येकबिल्वं शिवार्पणम् ।।७।।

मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे ।
अग्रतः शिवरूपाय ह्येकबिल्वं शिवार्पणम् ।।८।।

बिल्वाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ।
सर्वपापविनिर्मुक्तः शिवलोकमवाप्नुयात्।।

इति बिल्वाष्टकं सम्पूर्णम्।।

अंतिमधाम
www.antimdham.com
+91-846-0000-648